**हरितालो**, स्त्री, ( हरिताल + ङीष् । ) दूर्व्वा । आकाशरेखा । इति मेदिनी ॥ खड्गलता । इति विश्वः ॥ सौरभाद्रीयनक्षत्रविशेषयुक्त-चतुर्थी । यथा,—

"भाद्रे मासि सिते पक्षे वसुदेवतसंयुता ।
हरितालो चतुर्थी स्यात् सर्व्वाशोप्रीतिदा सदा ॥
भाद्रे मासि सिते पक्षे चतुर्थ्याख्याभियोगतः ।
ददाति किल्बिषं घोरं दृष्टश्चन्द्रो न संशयः ॥
करचित्रानलर्क्षेषु हरौ सूर्य्ये चतुर्थिका ।
हरितालो समाख्याता रुद्राणोप्रीतिदा सदा ॥"
इति राजमार्त्तण्डः ॥

**हरिताश्म**, [न्] क्ली, ( हरितं अश्म । ) तुत्थम् । पेरोजम् । इति राजनिर्घण्टः ॥

**हरित्पर्णं**, क्ली, ( हरित् पर्णमस्य । ) मूलकम् । इति राजनिर्घण्टः ॥ हरिद्वर्णपत्रयुक्ते, त्रि ॥

**हरिदश्वः**, पुं, ( हरित् अश्वो यस्य । ) सूर्य्यः । ( यथा, रघुः । ३ । २२ ।
"पुपोष वृद्धिं हरिदश्वदीधिते-
रनुप्रवेशादिव बालचन्द्रमाः ॥")
अर्कवृक्षः । इत्यमरः । १ । ३ । २८ ॥

**हरिदेवः**, पुं, ( हरिर्देवोऽधिष्ठात्रीदेवता यस्य ।) श्रवणानक्षत्रम् । इति हेमचन्द्रः ॥ हरिर्देवो यस्य इति बहुव्रीहौ, त्रि । हरिश्चासौ देवश्चेति कर्म्मधारये हरिमात्रबोधकः ॥

**हरिद्दर्भः**, पुं, ( हरिद्वर्णो गर्भो यस्य । ) हरिद्वर्ण-कुशः । हरिदर्भ इति च पाठः । तत्पर्य्यायः । खरपत्रः २ बृहच्छदः ३ अत्र पृथुच्छदोऽपि पाठः । शौरी ४ रूक्षदर्भः ५ दीर्घपत्रः ६ पवित्रकः ७ । अस्य गुणाः ।
"दर्भौ द्वौ च गुणे तुल्यौ तथापि च सिताधिकः ।
यदि श्वेतकुशाभावे त्वपरं योजयेद्भिषक् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमम् ।
मूत्रकृच्छ्राश्मरीतृष्णावस्तिरुक्प्रदरास्रजित् ॥"
इति भावप्रकाशः ॥
तन्मूलगुणाः ।
"कुशमूलं हिमं रूक्षं मधुरं पित्तनाशनम् ।
रक्तज्वरतृषाश्वासकामलादोषमोक्षकृत् ॥"
इति राजनिर्घण्टः ॥

**हरिद्रवः**, पुं, ( हरिवर्णः पिङ्गलवर्णः द्रव इव । ) नागकेशरचूर्णम् । इति त्रिकाण्डशेषः ॥

**हरिद्रा**, स्त्री, ( हरितं पीतवर्णं रातीति । हरित् + रा + कः । टाप् । ) ओषधिविशेषः । हलुद इति भाषा । तत्पर्य्यायः । निशाह्वा २ काञ्चनी ३ पीता ४ वरवर्णिनी ५ । इत्यमरः ।२।९।४१॥ कावेरी ६ उमा ७ वर्णवती ८ गौरी ९ पीतिका १० । इति जटाधरः ॥ पीतवालुका ११ हेमनाशा १२ भङ्गवासा १३ घर्षिणी १४ । इति शब्दरत्नावली ॥ पीतिका १५ रजनी १६ निशा १७ मेहघ्नी १८ बहुला १९ वर्णिनी २० रात्रिनामिका २१ । इति रत्नमाला ॥ हरित् २२ रञ्जनी २३ स्वर्णवर्णा २४ सुवर्णा २५ शिवा २६ दीर्घरागा २७ हलद्दी २८ वराङ्गी २९ जनेष्टा ३० वरा ३१ वर्णदात्री ३२ पवित्रा ३३ हरिता ३४ विषघ्नी ३५ पिङ्गा ३६ मङ्गल्या ३७ मङ्गला ३८ लक्ष्मीः ३९ भद्रा ४० शिफा ४१ शोभा ४२ शोभना ४३ शुभगाह्वया ४४ श्यामा ४५ जयन्तिका ४६ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफवातास्र-कुष्ठमेहकण्डुव्रणनाशित्वम् । देहवर्णविधायि-त्वञ्च । इति राजनिर्घण्टः ॥*॥ अन्यच्च ।
"हरिद्रा कफपित्तास्रशोथकण्डुव्रणापहा ।"
इति राजवल्लभः ॥
अपि च ।
"हरिद्रा काञ्चनी पीता निशाख्या वरवर्णिनी ।
कृमिघ्ना हलदी योषित्प्रिया हरिविलासिनी ॥
हरिद्रा कटुका तिक्ता रूक्षोष्णा कफपित्तनुत् ।
वर्ण्या त्वग्दोषमेहास्रशोथपाण्डुव्रणापहा ॥"*॥

अथ वनहरिद्रा ।

"अरण्यहलदीकन्दः कुष्ठवातास्रनाशनः ।"*।

अथ कर्पूरहरिद्रा ।

"दार्व्वी भेदाम्रगन्धा च सुरभिश्चारु दारु च ।
कर्पूरा पद्मपत्रा स्यात् सुरभिः सुरनायिका ॥
आम्रगन्धिहरिद्रा या सा शीता वातला मता ।
पित्तघ्न्यमधुरा तिक्ता सर्व्वकण्डुविनाशिनी ॥"
इति भावप्रकाशः ॥

**हरिद्रागणेशः**, पुं, ( हरिद्रावर्णो गणेशः । ) गणेशविशेषः । तन्मन्त्रो यथा,—

अथ हरिद्रागणेशः ।

"पञ्चान्तको धरासंस्थो बिन्दुभूषितमस्तकः ।
एकाक्षरो महामन्त्रः सर्व्वकामफलप्रदः ॥"
अस्य वशिष्ठ ऋषिर्गायत्री छन्दो हरिद्रागणपतिर्देवता गकारो बीजं लकारः शक्तिर्बीजेनैव षडङ्गकम् । ध्यानन्तु ।
"हरिद्राभं चतुर्ब्बाहुं हारिद्रवसनं विभुम् ।
पाशाङ्कुशधरं देवं मोदकं दन्तमेव च ॥"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनादि-पीठमन्वन्तां पीठपूजां विधाय पुनर्ध्यात्वा गणपतिं पूजयेत् । आवरणपूजाविनियोगादिकं एकाक्षरगणपतिवत् । अस्य पुरश्चरणं चतुर्लक्षजपः । त्रिमधुरयुक्तहरिद्राचूर्णमिश्रितैस्तण्डुलैरयुतहोमः । इत्यादि तन्त्रसारः ॥

**हरिद्राङ्गः**, पुं, ( हरिद्राया इव अङ्गं यस्य । ) हरितालपक्षी । इति शब्दचन्द्रिका ॥

**हरिद्राभः**, पुं, ( हरिद्राया आभा इव आभा यस्य । ) पीतशालः । कर्पूरकः । इति शब्दचन्द्रिका ॥ पीतवर्णः । तद्युक्ते, त्रि ॥ इत्यमरः । १ । ५ । १४ ॥ ( यथा, तन्त्रसारे ।
"हरिद्राभं चतुर्ब्बाहुं हारिद्रवसनं विभुम् ॥")

**हरिद्रारागः**, त्रि, ( हरिद्राया राग इव रागो यस्य । अचिरस्थायित्वादेवास्य तथात्वम् ।) अस्थिरसौहृदः । इति हेमचन्द्रः ॥ तत्पर्य्यायः । क्षणमात्रानुरागी २ । हरिद्राराग इव रागोऽस्येति हरिद्रारागः । हरिद्रारागस्याचिरस्थायित्वात् तथेति यावत् । यथा,—
"क्षणमात्रानुरागी च हरिद्राराग उच्यते ॥"
इति हलायुधः ॥

**हरिद्रुः**, पुं, ( हरिवर्णः द्रुर्वृक्षः । ) वृक्षः । इति हेमचन्द्रः ॥ दारुहरिद्रा । इत्यमरः ।२।४।१०१॥ तथा चोक्तम् ।
"दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च ।
कटङ्कटेरी पीता च भवेत् सैव च पचधा ॥
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च ।
पीतद्रुश्च हरिद्रुश्च पीतदारु कपीतकम् ।
दार्व्वी निशागुणा किन्तु नेत्रकर्णस्य रोगनुत् ॥"
इति भावप्रकाशः ।*॥
वृक्षविशेषः । हलदीवा इति हिन्दी भाषा । तत्पर्य्यायः । पीतदारु ५ पीतकाष्ठः ३ पीतकः ४ कदम्बकः ५ सुपुष्पः ६ सुराह्वः ७ पीतकद्रुमः ८ । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । मङ्गल्यत्वम् । पित्तवातनानात्वग्दोषनाशित्वम् । अङ्गकान्तिकरत्वम् । वश्यत्वञ्च । इति राजनिर्घण्टः ॥

**हरिद्वारं**, क्ली, (हरेस्तत्प्राप्तेर्द्वारमिव ।) स्वनामख्यातनगरम् । तत्तु तीर्थविशेषः । यथा,—
"शृणु देवि महामाये पठेच्चण्डीं शृणोत्यपि ।
गयायाञ्चैव यत् पुण्यं काश्यां विश्वेश्वराग्रतः ॥
प्रयागे मुण्डनाच्चैव हरिद्वारे हरेर्गृहे ।
तुल्यं पुण्यं भवेद्देवि सत्यं दुर्गे शिवे रमे ॥"
इति रुद्रयामले हरगौरीसंवादे रुद्रचण्डी ।*॥
तच्च गङ्गावतरणात् गङ्गाद्वारमिति ख्यातम् । तत्र स्नानादिफलं यथा,—
"ततो गच्छेत धर्म्मज्ञ नमस्कृत्य महागिरिम् ।
स्वर्गद्वारेण तत्तुल्यं गङ्गाद्वारं न संशयः ॥
तत्राभिषेकं कुर्व्वीत कोटितीर्थे समाहितः ।
लभते पुण्डरीकन्तु कुलञ्चैव समुद्धरेत् ॥
तत्रैकरात्रिवासेन गोसहस्रफलं लभेत् ॥"
इति पाद्मे भूमिखण्डे १२ अध्यायः ॥
अपिच ।
"सर्व्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा ।
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥
सवासवाः सुराः सर्व्वे गङ्गाद्वारं मनोरमम् ।
समागत्य प्रकुर्व्वन्ति स्नानदानादिकं मुने ! ॥
दैवयोगान्मुने तत्र ये त्यजन्ति कलेवरम् ।
मनुष्यपक्षिकीटाद्यास्ते लभन्ते परं पदम् ॥"
इति तत्रैव क्रियायोगसारे ३ अध्यायः ॥*॥
पुस्तकान्तरे गङ्गाद्वारस्थाने हरिद्वारमिति पाठः ॥

**हरिनाम**, [न्] क्ली, ( हरेर्नाम । ) श्रीहरेराख्यानम् । तन्माहात्म्यं यथा,—
"न कालनियमस्तत्र न देशनियमस्तथा ।